# shAradAstutiH

# शारदास्तुतिः

## Document Information

Text title : shAradAstutiH 4

File name : shAradAstuti.itx

Category : devii, sarasvatI, devI

Location : doc_devii

Author : Kukke. Subrahmanyashastri

Transliterated by : DPD

Proofread by : DPD

Description/comments : From Maharaja Sanskrit Mahapathashala patrika p. 39-44

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# शारदास्तुतिः

श्रीशारदाम्बायै नमः ।
कल्याणमूर्तिः करुणालवाला कलाधरोत्तंसकिरीटकोटिः ।
कलावती काङ्क्षितकल्पवल्ली करोतु कल्याणपरम्परां नः ॥ १॥

चक्रीकृतोल्लोचशिरःफणीन्द्रफणामणीभासुरतूलिकाढ्ये ।
श्रीमंटपान्तर्मृगराजपीठे विद्योतते नः कुलभागधेयम् ॥ २॥

ज्ञेयं मुनीन्द्रैश्चिरयोगसिद्धैस्सविन्मयं तत्परदेवतायाः ।
लीलागृहितं यदुपासकानां ध्ययोपलब्ध्यै विवृणोमि रूपम् ॥ ३॥

शृणोमि वाचं यदि लोचनेन पश्यामि चेत्पादतलेन रूपम् ।
पास्यामि चेदञ्जलिना महाब्धिं कल्पेय देव्या गुणवर्णनाय ॥ ४॥

तथापि वाचंयमसार्वभौमकृपालवालाप्तवचोभिरम्बाम् ।
स्तोष्यामि किञ्चित्प्रतिभातदृष्टश्रुतानुभूतोरुगुणप्रवाहैः ॥ ५॥

रत्नावजीकर्बुरितेन्दुरेखापरिष्कृतानर्घ्यकिरीटकोटिम् ।
लावण्यवापीपुलिनायमा न ललाटखेलच्चिकुरालिचक्राम् ॥ ६॥

उन्निद्रचाम्पेयपरागगन्धि मधुव्रतश्रीमदरालकेशीम् ।
भोगीन्द्रभोगोपमनीलवेणी विषक्तचूडामणिनागपालीम् ॥ ७॥

लावण्यकुल्यायितशोणकान्ति सीमन्तरेखाग्रचलल्ललन्तीम् ।
भ्रूचापसंयोजितमारबाणनिभाक्षिलक्षीकृतधातृवक्राम् ॥ ८॥

प्रवर्षकाम्भोधरकीर्यमाणवर्षोपलस्पर्धिकटाक्षवीक्षाम् ।
हीरप्रभाभासुरचम्पकाभनासाग्रविस्फारिमणिप्रवेकाम् ॥ ९॥

विकस्वराम्भोरुहकेसराभरदांशुसन्मिश्रितमुग्धहासाम् ।
रदच्छदापाटलकुन्दकोशमाला प्रतिस्पर्धिशिताग्रदन्ताम् ॥ १०॥

वर्णावलीवादनशोणरत्न कोणायमानाग्रविलोलजिह्वाम् ।

कपोलपालीमणिदर्पणान्तः स्फुरत्प्रभाविम्बितकर्णपूराम् ॥ ११॥

विसृत्वरस्मेरमुखेन्दुबिम्ब ज्योत्स्नासुधापीनजगच्चकोराम् ।
विपञ्चिकाञ्चत्कलनादभङ्गी विभावनामोदविलोलवक्राम् ॥ १२॥

वक्राब्जनालप्रतिमान कण्ठमृणाल काण्डायित हरिहाराम् ।
रेखात्रयीसूचित भर्तृभाग्यमाङ्गल्य सूत्राञ्चित कम्बुकन्ठीम् ॥ १३॥

ओष्ठप्रभालक्तकरूषित श्रीकौशेयकूर्पासपिनद्धवक्षाम् ।
सुवृत्तमुक्तावलि काङ्क्ष्यमाणस्तन्यामृतापीन कुचाब्जकोशाम् ॥ १४॥

चिरागतानेक सुतावलोक स्नुतस्तन क्षीरकणार्द्रहाराम् ।
अभष्टिदान प्रथितामरद्रु शाखायमानां सलबाहुपाशाम् ॥ १५॥

शाणोपलोल्लीढ मणिप्रवेक केयूरवल्लीवलयाङ्गुलीयाम् ।
प्रपन्नलोकाभयदान मुद्रापुस्ताक्षमालां कुशपाशहस्ताम् ॥ १६॥

वैडूर्यशोणोपलहीर नीलप्रत्युप्त हेमाङ्गदकङ्कणाढ्याम् ।
ताटङ्क शोणोपल बीजपूर बीजभ्रमोत्कण्ठकराग्रकीराम् ॥ १७॥

आपीनवक्षोरुहभार भुग्नवलित्रयीपात पिनद्धमध्याम् ।
सुवर्ण काञ्चीमणिसूत्रनद्धस्पर्शानुमेयाम्बरगूढगच्छाम् ॥ १८॥

रत्न प्रवेकाञ्चितनूपुराग्र मणिप्रभापिञ्जर पादपद्माम् ।
शरत्प्रसन्नेन्दु कलाभिराम नखांशुविद्रावितहार्दतापाम् ॥ १९॥

प्रतप्तजाम्बूनद कायकान्तिच्छटापि शङ्गीकृतसौधमालाम् ।
शृत्यन्त सीमान्त विभाग रेखाप्रमाणदण्डायितगात्रयष्टिम् ॥ २०॥

शीतांशुतारालि तुषारहीर निभोत्तरासङ्गसमृद्धशोभाम् ।
सर्वज्ञताध्यापन लब्धवर्णप्रसाददाना दृतपक्ष्यलाक्षि ॥ २१॥

जगत्रयापत्यसपीति मोदपर्यासवक्षोरुह पूर्णकुम्भाम् ।
लोकत्रयी संवननप्रयुक्त यन्त्रोपमासच्चेनवक्रबिम्बाम् ॥ २२॥

सांसिद्धिकागन्तुक कान्तिपूरतरङ्गरिङ्गत्तरलागशोभाम् ।
निजाङ्ग संसर्गविशेषरम्यदुकूल रत्नाभरण प्रसूनाम् ॥ २३॥

पूर्णेन्दु कल्लोलितदुग्ध सिन्धुफेनायमानाम्बवर संवृताङ्गी ।
भेदभ्रमोन्मूलनदक्षतत्व विज्ञानमुद्राञ्चितपाणिपद्माम् ॥ २४॥

मृणालसूत्रीविशदोपवीत मुक्ताक्षमालाकनकालुरम्याम् ।
भ्रूवल्लरीकोमलरुन्दकल्प काश्मीरपङ्कार्द्रतमालपत्राम् ॥ २५॥

सिन्दूरपाली सुषुमानुषङ्ग किम्मीरकालागरुचैत्रकाढ्याम् ।
विरञ्चिनेत्राष्टकपीयमान सौन्दर्यपीयूषमुखेन्दुलक्ष्मीम् ॥ २६॥

ध्यानायन यच्चजगद्गुरूणा क्षेमायनं भक्तिपरायणानाम् ।
रसायनं धातृविलोचनानामेकायनं नश्शरणागतानाम् ॥ २७॥

भक्तावलीमानसराजहंसी श्रीचक्रराजाश्रितदिव्यमूर्तिम् ।
श्रीशृङ्गशैलेन्द्रविहारलोलां श्रीशारदाम्बां सततं स्मरामि ॥ २८॥

श्रीहरीमतीमन्दवखण्डचूडः दयारसल्लिन्नविलोचनान्ताम् ।
चकोरसाहित्यनिदानवक्त्रां स्मरामि भक्तेष्टदकल्पवल्लीम् ॥ २९॥

तालीपलाशाञ्चितकर्णजाहा काश्मीररेखोज्ज्वलफालमूला ।
निशाह्वयाचूर्णविमृष्टगण्डा धातुःपुरन्ध्री हृदि सन्निधत्ताम् ॥ ३०॥

प्रतिष्ठितां श्रीगुरुशङ्करार्यैः समर्चिता संयमिसार्वभौमैः ।
तपोभिरेषां सुसमिद्धशक्तिं स्थाने श्रुतिस्त्वां गुरुमूर्तिमाह ॥ ३१॥

नारायणोरस्थलगेहिनीति विरिञ्चिवक्त्राब्जकुटुम्बिनीति ।
श्रीकण्ठवामाङ्गवशंवदेति यथाभिलाषं समुपासते त्वाम् ॥ ३२॥

श्रुत्वा स्वरासि प्रकृतिः पदेषु वाक्येषु हेतुः प्रमितिः प्रमाणे ।
क्रियाफला तत्प्रतिभूस्त्वमेव सर्वात्मना व्याप्य विभासि विश्वम् ॥ ३३॥

कल्या प्रदुग्धे चतुरः पुमर्थान् हिंसा च घोरा मुषती विधत्ते ।
शक्तिद्वयी तेऽम्ब निसर्गसिद्धा नवाम्बुदस्येव सुवृष्टिवज्रे ॥ ३४॥

या ते प्रतिष्ठेति कला प्रसिद्धा भूमौ यया व्याप्तमिदं समग्रम् ।
तयैकया विश्वमिदं बिभर्षि विश्वम्भरां त्वां हृदि भावयामि ॥ ३५॥

मातश्चतुष्षष्टिकलाभिरेतच्चराचरं विश्वमनुप्रविश्य ।
त्वमेव तच्चेतयसीह सर्वचैतन्यरूपां शरणं प्रपद्ये ॥ ३६॥

विद्येत्यविद्येति च यत्स्वरूपे मोक्षाय बन्धाय च हेतुभूते ।
लीला तवैवाम्ब नचेत्कुतावो तमःप्रकाशौ सहयोगिनौ स्तः ॥ ३७॥

याश्शक्तयस्सर्गविधौ विधातुरुच्चावचाः कारणतां प्रसन्नाः ।
तासां परासां च समष्टिरूपामम्बामहं भावनयाऽवलम्बे ॥ ३८॥

अव्याकृतं पूर्वमिदं समग्रं तत्तद्विशेषग्रहणाय नाम्ना ।
तद्व्याकरोस्त्वं वचसां सवित्रि तत्त्वां विना चेतयते न किञ्चित् ॥ ३९॥

ऋचा नुवाकेन च सामशस्त्रैर्विधिप्रयोगान् विविधान्विधाय ।
ददासि लोकद्वयसौख्यमेषां तां वाङ्मयीं शान्तिकलामुपासे ॥ ४०॥

सुधासवर्णां तरुणारुणाभामाराध्य केचिद्वृणुते स्वकामान् ।
जुषन्ति भोगान्विहितान् त्वयैव ते वञ्चितास्त्वन्महिमानभिज्ञाः ॥ ४१॥

संविन्मयीं त्वां समुपासते ये संवित्स्वरूपाः खलु ते भवन्ति ।
श्रद्धामयोयं पुरुषश्श्रुतश्च कीटोऽपि पेशस्करतां प्रयाति ॥ ४२॥

सेवालसोहं न च कामकामी सेवार्थिनी त्वं नहि पूर्णकामा ।
नैवावयोस्सेवकसेव्यभावस्तद्भेदहानौ किमुशिष्यते सा ॥ ४३॥

ब्रह्माहमस्मीति निदशर्यन्तु गवेषितं तैरपि तावदेव ।
तस्यापि चैतन्य मुपानयन्ती चिद्रूपिणीं त्वामहमित्यवैमि ॥ ४४॥

दयाम्बुधिं त्वां जननीति मत्वा विधूयगर्वाज्जननीतिमम्ब ।
अत्याचरं धर्मपथं च मूढो मामुद्धरेति प्रलपन्नलज्जे ॥ ४५॥

त्वत्पादपङ्केरुहदासमेनं नैवप्रतीकर्तुमलं सुरा वा ।
इति प्रमत्तः करवाणि पापं यशस्त्वकीयं परिरक्ष मा वा ॥ ४६॥

न प्रार्थितामेव सुरराजलक्ष्मीर्नवाञ्छितं वा भुवनाधिपत्यम् ।
इयन्मया प्रीयितमेव देहि तवाम्ब पादाम्बुरुहस्य दास्यम् ॥ ४७॥

बालस्य मूकस्य जडस्य चापि दयाम्बुरारो दयसे त्वमम्ब ।
मामडेमूकं समुपेक्षसे किं विशृङ्खला ते प्रभुता धरित्र्याम् ॥ ४८॥

मातुर्दयापात्रमहं भवेयं परुत्परार्यैषम इत्यवेक्ष्य ।
इयन्ति वर्षाण्यतिवाहितानि फले विलम्बः किमभाववादः ॥ ४९॥

अनुग्रहं वा मयि निग्रहं वा यत्कर्तुकामासि कुरुष्व तूर्णम् ।
द्वयेपि तस्मिन्विहिते त्वयैकः सूतेत्रिवर्गन्त्वपरोपवर्गः ॥ ५०॥

त्वय्यर्पिते कर्मणि तत्फले च मांमाविकुर्यादिति निव्वृतेपि ।
सा वासना मां नजहाति किं तत् त्वया गृहीतन्नु समुज्झितं नु ॥ ५१॥

उपासनाभिर्दहरात्मविद्याविशेषावज्ञीननिवर्तिताभिः ।

प्रीणासिचेत्त्वं तदबोधयन्त्या त्वयैव मातर्ननु वञ्चितास्स्मः ॥ ५२॥

गुरूपदेशैर्निगमावबोधैस्सतां चरित्रैर्मनसः प्रसादैः ।
निश्चप्रचन्ते करुणामयी त्वं कथं मृषोद्यं तदिति प्रतीमः ॥ ५३॥

नापेक्षसे त्वं विधिवत्सपर्यां न योगसिद्धिं न दृढां च भक्तिम् ।
सकृत्प्रणामाञ्जलिनैव तुष्टा तनोषि कल्याणपरम्परां नः ॥ ५४॥

स्मृतापि तापत्रयदारिणीति कृतापराधेपि दयामयीति ।
मत्वा शरण्यां शरणागतोहमीदृग्गुणान्या क्व च वा वदान्या ॥ ५५॥

शोणाश्मनीकाशतनुप्रकाशां विकोशितश्यामकुशेशयाक्षीम् ।
दिशामहेशाश्रितपाददेशां स्मरामि कामेश्वरकोशनाथाम् ॥ ५६॥

एणीनिभाक्षीं करुणाम्बुराशिद्रोणीकृतापाङ्गझरीं पुराणीम् ।
श्रोणीतटालम्बितचारुवेणीं वाणीं भजे मोहलताकृपाणीम् ॥ ५७॥

वीटीरसापाटलदन्तवाटी चेटीकृताशेषसुपर्वकोटी ।
पाटीरगौरा त्रिजगन्नटीयमाटीकतां चेतसि वाग्वधूटी ॥ ५८॥

कराग्रसंलालितराजकीरान् प्रालम्बिमुक्ताफलतारहारान् ।
गिरांविदूरान्निगमान्तसारान् समाश्रयामो विधिधर्मदारान् ॥ ५९॥

श्रीशारदेति चतुरास्यकुटुम्बिनीति वाग्वादिनीति वरदेति च नामपङ्क्तौ ।
एकैकमेव निखिलार्थकरं तदन्यदाम्रेडितं हि चरितार्थपदेषु रूढम् ॥ ६०॥

बालार्कपाटलमरीचलसद्दुकूला लीलास्मितद्विगुणमौक्तिकरम्यमालाम् ।
वेलातिलन्घितदयोर्मिलनेत्रखेलां बालां नमामि कुटिलालकशोभिफालाम् ॥ ६१॥

धात्री समस्तजगतां दुरिताब्धियानपात्री समग्रनिगमान्तगिरां सवित्री ।
दात्री त्रिवर्गविभवस्य दयासुधायाः पात्रीकरोतु हृदि मां सुकृतस्य गोप्त्री ॥ ६२॥

अभ्यर्चितासि विनुतासिनतासि मातरुष्टासिकांसमवलम्ब्यनिरीक्षितासि ।
जानासि मामशरणं फलदासि नूनं काले दयस्व समयाप्तफलं सखाय ॥ ६३॥

निखिलभुवनरक्षा दक्षिणा नेक्षसे मां
व्यवहितनिकटस्था न प्रलापं शृणोषि ।
मयि ननु कुलदासे यद्युपेक्षां कृषीष्टाः
भवतु मम हि चेतस्त्वस्मृतिं नैव जह्यात् ॥ ६४॥

सरसललितसूक्तैः फुल्लमल्लीमतल्ली

विगलितमकरदस्फारमाधुर्यसिक्तैः ।
कृतनुतिरतिवेलं जातचेतःप्रसक्तिः
श्रुतिविततिसवित्री शारदां संस्मरामि ॥ ६५॥

इति कुक्के. सुब्रह्मण्यशास्त्रीविरचिता शारदास्तुतिः सम्पूर्णा ।

Encoded and proofread by DPD

*shAradAstutiH*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*